ॐ

ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# Journal of Veda Samskṛta Academy

## A National Peer-Reviewed Research Journal

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**Volume : XVI**
**July to December - 2020**

*Edited by the Director :*

**Dr. Gopalkrishna Hegde**

Jyotishashastra-Dharmashastra Vidwan

**VEDA SAMSKRITA ACADEMY (R.)**
Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVI : July to December – 2020

# संशयः

डा. भास्करभट्टः जोशि (बेङ्गळूरु)*

कणभक्षेण मुनिना वैशेषिकसूत्रेषु बुद्धिनिरूपणप्रस्तावे "आत्मा ज्ञानसवायी"[१]त्ययमंश अभ्यधायि ।

सर्वानुभवसिद्धं हि ज्ञानं देहेन्द्रियादिसङ्घातव्यतिरिक्तद्रव्यस्यात्मनो विशेषगुणः । एतस्य लक्षणं न्यायसूत्रे "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्"[२]इति न्यरूपि ।

बुद्ध्यादयः अष्ट आत्मगुणाः । सुखादीनां सर्वेषाम् उत्तरेषां कारणीभूता इयं बुद्धिः । ज्ञानमिति अस्य नामान्तरम् । इदं च ज्ञानम् द्विविधम् । स्मरणात्मकम् अनुभवात्मकं चेति । अनुभवः पुनः द्वेधा विभज्यते । यथार्थःअयथार्थश्च , । तद्वति तत्प्रकारकानुभवः यथार्थः । यथावस्थितमेव अर्थं विषयीकुर्वन्ननुभवः यथार्थ इत्यर्थः । द्वितीयः अनुभवः तदभाववती " तत्प्रकारकानुभव अयथार्थः ।

अयथार्थानुभवः नाम भ्रमः । सः त्रिविधः । संशयःतर्क ,विपर्ययः ,-भेदात् । तेषु प्रथमः संशयः । संशये कश्चन धर्मी भवति । दौ विरुद्धौ धर्मौ भवतः । तयोः कोटि इति नाम भवति। यथा- दूरात् स्तम्भं दृष्ट्वा 'अयं पुरुषो वा स्थाणुर्वा' इति सन्देहः जायते । प्रकृते धर्मी भवति अयमिति पुरोवृत्ति स्तम्भः । तस्मिन् धर्मद्वयं भासते । स्थाणुत्वं पुरुषत्वं च इति । एतौ उभौ धर्मौ विरुद्धौ भवतः । यत्र पुरुषत्वं भवति तत्र स्थाणुत्वं न भवति । अतः तौ धर्मौ एकत्र न भवत इति विरुद्धौ । तादृशौ विरुद्धौ धर्मौ पुरःस्थिते वस्तुनि भासते । अत इदं ज्ञानं संशयः ।

## संशयस्य सामान्यकारणानि

उभय साधारणधर्मज्ञानम्, असाधारणधर्मज्ञानम्, विप्रतिपत्तिजन्य-कोटिद्वयज्ञानम्, उपलब्धिः अनुपलब्धिः, सामान्यप्रत्यक्षम्, विशेषाप्रत्यक्षम्, विशेषस्मृतिः कोटिद्वयस्मरणम्, धर्मिज्ञानञ्च संशयस्य सामान्यकारणानि भवन्ति ।

---

१. वै. द. सूत्रम्-३.१.२ २. न्यायदर्शनम्- १.१.१५, पृ. सं. २१३

## विशेषसंशयप्रकाराः

स्थाणुपुरुषसाधारणम् ऊर्ध्वतालक्षणं धर्म पुरोवर्तिनि पश्यतः स्थाणुपुरुषौ स्मृत्वा स्थाणुत्वनिर्णायकं वक्रत्वादिकं पुरुषनिर्णायकं शिरः-पाण्यादिकं अपश्यतः पुरुषस्य मनसि डोलायमानं स्थाणुर्वा पुरुषो वेति ज्ञानं समुत्पन्नं भवति । एवं शब्दे आकाशविशेषगुणत्वम् असाधारणधर्मम् उपलभ्मानस्य निर्णायकमजानतः पुरुषस्य किमयं शब्द आकाशवत् नित्य उत अनित्य इति संशयो भवति । तथा इन्द्रियाणि भौतिकानीति वैशेषिकाणाम्, अभौतिकानीति संख्यानाञ्च विप्रतिपन्नं सिद्धन्तं जानतः निश्चायकमपश्यतः पुरुषस्य संशयो भवति इन्द्रियाणि भौतिकानि उत अभौ विकानीति । तथा तस्मिन् वृक्षे पिशाचोऽस्तीति वार्तां श्रृत्वा वृक्षसमीपं गतस्य पुरुषस्य यदा पिशाचो नोपलभ्यते तदा निर्णायकाभावात् विद्यमान एव पिशाचोऽन्तर्हितो नोपलभ्यते उत पिशाच अविद्यमान एवेति संशयो भवति ।

## न्यायेतरदर्शनेषु संशयस्य निरूपणम्

निर्णायकाभावसहकृतसाधारणधर्मवद्धर्मिज्ञानं संशयकारणमिति प्रकारान्तरेण मध्वमतानुयायिनो वदन्ति । ततश्च रज्जौ इयं रज्जुरिति ज्ञानं प्रमा, अयं सर्प इति ज्ञानम् विपर्ययः, रज्जुर्वा सर्पो वेति ज्ञानं संशयोः । उक्तश्चेदं संशय निरूपणावसरे-

सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशयः ।
दृष्टश्च दृष्टवत् यथादृष्टमयथादृष्टश्चोभयथादृष्टत्वात् विद्याविद्यातश्चेति ॥३

प्रमाणसमुच्चयादि ग्रन्थेभ्यः बौद्धानां संशयलक्षणम् अनूदितं दृश्यते । साधकबाधकप्रमाणाभावात् अनवस्थितानेककोटिकसंस्पर्शि ज्ञानं संशयः४ यथा स्थाणुर्वा पुरुषो वेति प्रमाणनयतत्त्वालोके, अस्वसंविदितगृहीतार्थदर्शनसंशयादयः प्रमाणाभासा इति परीक्षामुखसूत्रे उभयकोटिसंस्पर्शी स्थाणुर्वा पुरुषो वेति परामर्शः संशय५ इति प्रमेयरत्नमालायाञ्च जैनाः ।

---

३. रा. वा.- १-६-९-३६-११ (राजवार्तिकम्) ४. प्रमाणनयतत्त्वालोकः ।
५. प्रमेयरत्नमाला ।

अनुभयत्रोभयस्पर्शी प्रत्ययः संशयः, अनुभयस्वभावे वस्तुनि उभया-न्तपरिमर्शनशीलं, ज्ञानं सर्वात्मना शेत इवात्म यस्मिन् सति स संशयः, यथा अन्धकारे दूरादूर्ध्वाकारवस्तूपलम्भात् साधकबाधकप्रमाणाभावे सति स्थाणुर्वा पुरुषो वेति प्रत्ययः । अनुभयत्रपदं उभयरूपे वस्तुनि उभयकोटिस्पर्शेऽपि संशयत्वनिराकरणाय- यथा अस्ति च नास्ति च घटः नित्यश्चानित्यश्चात्मा इति प्रमाणमीमासांयाम् । ततश्च त्रिकोटिकस्संशयोऽपि जैनग्रन्थेषु दृश्यते । उभयकोटिस्पृग् विज्ञानं संशय६ इति योगसूत्रतत्त्ववैशारद्यां दृश्यते । सांख्यदर्शने विशिष्य लक्षणं न दृश्यते । पाणिनीयदर्शने विरुद्धानेककोटिकं ज्ञानं संशय७ इति महाभाष्योद्योत एवं संशयमापन्न८ इति पाणिनिसूत्राच्च ज्ञायते । विरुद्ध- कोटिकमिति निर्देशात् उभयकोटिकमित्यत्रैव नाग्रहः परं त्रिकोटिकमपि संशयः व्याकरणदर्शने स्वीक्रियत इति त्रिसंशया इति शब्दे त्रिषु संशया व्यधिकरण- बहुब्रीहिश्चेति९ महाभाष्यं नवेति विभाषा चात्र प्रमाणम् ।

नानाकोट्यवलम्बी संविदाभासस्संशय इति प्रमाण लक्षणे । स चाज्ञानसमुत्थतथाविधप्रत्ययाभासफलम् । तत्रोदाहरणं - यथाधिगते पदार्थे तत्त्वापरिज्ञानात् स्थाणुर्वा पुरुषो वेति तत्रैव । प्राभाकरमीमांसादर्शने तु संशयो न एकं विज्ञानम् । किन्तु द्वे एते स्थाणुत्वपुरुषत्वगोचरे प्रमृष्टतत्तांशे परस्परविनिर्मुक्ते पुरःस्थितोर्ध्ववस्तुदर्शनाज् जायमाने स्मृतिरूपे । एतत्सर्वं यथार्थमेव । परस्परविनिर्मुक्तयोस्तयोर्विशेषयोः पुरःस्थिते धर्मिणि एकस्यापि व्यवस्था नास्तिति व्यवहारं प्रवर्तयिता प्रवर्तयितुमशक्नुवन् संशेत इति तत्र संशयव्यवहार इत्युक्तम् प्रकरणपञ्चिका तन्त्ररहस्ये च । डोलायामाना प्रतीतिस्संशय इति षड्दर्शनसमुच्चय वृत्तौ । अनवधालणज्ञानं संशय इति लक्षणं न्यायसारे प्रतिपादितम् । न्यायभूषणश्च ज्ञानद्वयवादिनः संशयमनङ्गीकुर्वाणान् मीमांसकान् खण्डयति । युक्तिरत्र प्रदर्शिता - प्रत्यक्षपरिदृष्टं गोमयमभिलक्ष्य कश्चनोन्मत्तः प्रलपति नेदं गोमयम् विकारप्रत्ययान्तगोशब्दवाच्यत्वात् पायसवत् । तद्वत्सार्वजनीनानुभवसमर्थितं संशयं निराकुर्वन् गोमयपायसीयन्यायेन उपेक्षणीयः ।

---

६. योगसूत्रतत्त्ववैशारदी, १. ३० ७. महाभाष्योद्योत, १-३-१-९

८. पाणिनिसूत्रम्, ५-१-७३ ९. महाभाष्यम्, १-१-४४

सन्देहः खलु सर्वप्राणिनां अनवधारणप्रत्ययात्मकत्वेन स्वात्मसंवेद्यः, स धर्मिविषयो वा भवतु धर्मविषयो वा, एकं ज्ञानं वा भवतु अनेकं वा, तात्त्विकातात्त्विकार्थविषयो वा, किमेभिर्विकल्पैः, अस्य बालाग्रमपि खण्डयितुं न शक्यत इति ।

एकमेवान्तःकरणं वृत्तिभेदात् मनोबुद्धिरहङ्कारश्चित्तमिति तेषां विषयाश्च "संशय-निश्चयो गर्वस्स्मरण"मित्यङ्गीकुर्वाणानां अद्वैतिनां मते जिज्ञासाजनकान्तःकरणवृत्तित्वं संशयत्वम्, उभयकोटिस्पृग् ज्ञानम्, यथा स्थाणुर्वा पुरुषो वेति, नैकधर्मिकविरुद्ध - भावाभावप्रकारकज्ञानत्वमिति संशयलक्षणानि वेदान्तापरिभाषा-शिखामणि- भगवत्यादिषु विद्यन्ते । परन्तु अद्वैतवेदान्तदर्शनीये तत्त्वप्रदीपिकाख्ये चित्सुखीये द्वितीयपरिच्छेदे - अनवधारणज्ञानं संशयः, विरुद्धोभयकोटिसंस्पर्शि ज्ञानं संशयः, अनिर्धारितोभयकोटि संस्पर्शि ज्ञानं संशयः, जिज्ञासाजनकं मिथ्याज्ञानं संशयः, विपर्ययेतरमिथ्याज्ञानं संशयः, संशयत्वजातियोगि संशयः इति लक्षणान्तराण्यनूद्य-

अनिरुक्ते रवधृतेरतिव्याप्तेर्द्वयोरपि ।<br>
अव्याप्तेर्विभ्रमाभेदाज्जातिसाङ्कर्यसक्तितः ॥

इत्यनया प्रसिद्धया कारिकया सविस्तरं च तत्कालपर्यन्तानि यानि संशयलक्षणानि तानि प्रदूष्य संशयः सर्वथापि न निरूपणपथमवतरतीति संशयवादः खण्डितः । एवं खण्डनखण्डखाद्येऽपि चतुर्थपरिच्छेदे संशयवादः खण्डितः ।

एवं विशिष्टाद्वैतदर्शने पुरः किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायज्ञानं यथार्थमेवेति तेषां सिद्धान्तात् संशयस्य प्रत्यक्षेऽन्तर्भावो वर्णितः । तेषामयं सिद्धान्तः- स्थाणुर्वा पुरुषो वा इत्यत्र पुतोवर्तिवस्तुविज्ञानं स्थाणुत्वपुरुषत्व विषयकं ज्ञानं चैकमेवेति वक्तुं न शक्यते । पुरोवर्तिवस्तुनः स्थाणुत्व-विशिष्टतया भाने पुरुषत्वविशिष्टतया भानासम्भवात् । एवं पुरुषत्व विशिष्टतया भाने स्थाणुत्वविशिष्टतया भानासम्भवात् । तथा च तत्र ज्ञानद्वयमवश्यं वाच्यम् । तत्र चोर्ध्वद्रव्यभानमनुभवः ।

स्थाणुत्वपुरुषभानन्तु स्मरणम्। तत्रापि पूर्वानुभवः । तेन कोटिद्वयस्मृति स्थाणुपुरुष संस्कारोद्बोधे पश्चात् कोटिद्वयस्मरणं जायते । यथार्थत्वन्तु द्वयोरप्यनयोर्निर्विवादमेवादमेवेति वदन्ति । यतीन्द्रमत- दीपिकाख्ये ग्रन्थे स्पष्टतया निरूपयामास ।

अनवधारणज्ञानं, एकस्मिन् धर्मिणि भासमानविरुद्धानेकाकारा-वगाहीज्ञानं वा संशयः - यथा स्थाणुर्वा पुरुषो वेति द्वैतदर्शने प्रमाणपद्धति-प्रमाणसंग्रह- प्रमाणचन्द्रिकादौ दृश्यते । एवं चैतन्यसिद्धान्ते भ्रमः प्रमादः विप्रलिप्सा करणापाटवश्चेति पुरुषदोषाश्चत्वारः तेषु भ्रमः संशयविपर्यासभेदेन द्विधा । तत्र संशयः किंस्विन्नरो वा स्थाणुर्वा इत्यादिबुद्धिरित्युक्तम् । (श्रीतत्त्वसन्दर्भव्याख्या)

संशयोऽथविपर्यासः निश्चयः स्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥

इति भागवतात् संशयादिज्ञानानां बुद्धिवृत्तित्वं स्वीकृत्य एकस्मिन् धर्मिणि विरुद्धानेकप्रकारकज्ञानं संशय इति लक्षणमुक्तं वल्लभदर्शने प्रस्थानरत्ना करप्रमाणपरिज्छेदे । शैवदर्शनीयशैवपरिभाषायां द्वयावलम्बा संशयो बुद्धि- स्समानाकारदर्शनादिति पौष्करागमं (प्रथमपरिच्छेदे, श्लोकं 5) प्रमाणीकृत्य साधारण धर्मदर्शनात् कोटिद्वयावलम्बिनी बुद्धिस्संशयः यथा - स्थाणुर्वा पुरुषो वेत्युक्तम् ।

## न्याय-वैशेषिकदर्शनम्

"समानानेकधर्मोपपत्तेः विप्रतिपत्तेः इति वैशेषिकसूत्रेषु निरूप-यामास । उपलब्ध्यनुपलब्ध्यवस्थातश्च संशयः१० इति न्यायसूत्रेषु च संशय निरूपितः । साधर्म्यदर्शनात् विशेषोपलिप्सोर्विमर्शस्संशय इति बौद्धाः । (न्यायतार्तिक 1-1-23)

यद्यपि सन्निकर्षजन्यत्वात् संशयोऽपि प्रत्यक्षमेव तथापि अनुपलब्ध अनिर्णीते वा न न्यायः प्रवर्तते किन्तु सन्दिग्धे इति न्यायात् संशयः न्यायपूर्वाङ्गं भूत्वा यथार्थज्ञानोत्पत्तौ सहकारी भवतीति संशयः ज्ञानप्रयोजन इति संशयप्रयोजनं वक्तव्यम् ।

---

१०. न्यायसूत्रम्, १-१-२३

## संशयलक्षणानि

समानानेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यव्यवस्थातश्च विशेषा- पेक्षो विमर्शस्संशय इति११ न्यायसूत्रे, एवं समानधर्माधिगमात् समानधर्मोपपत्तेः विशेषस्मृत्यपेक्षो विमर्शस्संशय इति न्यायवार्तिके । परन्तु विमर्शस्संशय इत्येव लक्षणम् । अन्यत्सर्वं हेतुकथनमेव चोक्तम् । अत एव किंस्विदिति वस्तुविमर्शमात्रं अनवधारण ज्ञानं संशय इति, वस्तुस्वरुपा-नवधारणज्ञानं संशय इति१२ लक्षणान्तरमपि न्यायभाष्य वार्तिकयोर्विस्तृतम् । तथा च सामानधर्मादिभ्य उत्पन्नो विषयस्य विशेषं यो नावधारयति स संशय इति वक्तव्यम् । सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशय इति१३ वैशेषिकसूत्रम् । प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनात् उभयविशेषानु-स्मरणात् अधर्माच्च किंस्विदित्युभयावलम्बी विमर्शः संशय इति प्रशस्तपादभाष्ये ।

एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशय१४ इति वैशेषिकोपस्कारे । एकस्मिन् धर्मिणि विरूद्धनानाधर्मवैशिष्ट्यज्ञानम्, पकधर्मावच्छन्नविशेष्यकभावाभावप्रकारकं ज्ञानं वा संशयः, यथा पर्वतो वह्निमान् वा नवेति लक्षणराजौ विद्यते । स संशयो मतिर्या स्यात् एकत्राभावाभावायोरिति१५ कारिकावल्याम्, एकधर्मिकविरूद्धभावाभाव-प्रकारकं ज्ञानं संशय इति विश्वनाथीयगौतमसूत्रवृत्तौ मुक्तावल्याम् तर्कसंग्रहे च दृश्यते। एवं एकस्मिन् धर्मिणि विरूद्धनानार्थावमर्शित्वम्, एकस्मिन् धर्मिणि भासमानविरुद्ध- नानार्थावमर्शित्वम्,१६ संशयत्वमिति लक्षणानि लक्षणराजौ निर्दिष्टानि । ततश्च एकस्मिन् धर्मिणि भासमानविरुद्धानेकाकारावगाहि-ज्ञानत्वं संशयत्वमिति पर्यवसितम् । एकस्मिन् पुरोवर्तिनि पदार्थे भासमानविरुद्धानेकाकारौ स्थाणुत्वपुरुषत्वे, तदवगहि ज्ञानं अयं स्थाणुर्वा पुरुषो वा इत्याकारकं ज्ञानम्, तस्मिन् ज्ञानत्वस्य सत्वाल्लक्षणसमन्वयः ।

---

११. न्यायसूत्रम्, १-१-२३
१२. न्यायभाष्यम्, १-१-२३
१३. वैशेषिकसूत्रम्, २-२-१७
१४. वैशेषिकोपस्कारः ।
१५. कारिकावली ।
१६. लक्षणराजी ।

अनेकांकारानवगाहिनि अयं घट इति ज्ञाने अतिव्याप्तिवारणाय अनेकाकारानवगाहिनिति पदम् । घटपटस्तम्भाः, स्थाणुपुरुषौ, इत्यादौ समूहालम्बनज्ञाने अतिव्याप्तिवारणाय एकस्मिन् धर्मिणीति पदम् । वृक्षः शिंशुपा, घटो द्रव्यम्, इत्यादौ वृक्षधर्मिकवृक्षत्व-शिंशुपात्वाद्यनेका-कारावगाहिनि ज्ञाने अतिव्याप्तिवारणाय विरुद्धेति पदम् । इदं रजतमिति विरुद्धानेकाकार- वगाहिज्ञानत्वस्य सत्वेऽपि विरोधत्वस्याभासमानत्वाभावात् नातिव्याप्तिः । विरुद्धोभयारोपसामग्री द्वयसमाजादुभयारोप एक एव भवति स एव संशय इति चिन्तामणौ प्रामाण्यज्ञप्तिवादे । अनवधारणं ज्ञानं संशय इति सप्तपदार्थाम् । अनवधारणात्मकः प्रत्ययः, अवधारणावर्जितं ज्ञानं संशय इति तार्किकरक्षायाम् । परन्तु अवधारणत्वं संशयभिन्नत्वम्, तथा च अवधारणभिन्नं ज्ञानं संशयः संशयः भिन्नं च ज्ञानमवधारणमिति अन्योन्याश्रयापत्तिः ।

अवच्छेद्य-अवच्छेदकभावापन्नविषयतावत्वं संशयत्वमिति गादा-धरीये सत्प्रतिपक्षे,१७ धर्मितावच्छेदकावच्छेदेन अन्यतरकोट्यवगाहिज्ञानं संशय इति नीलकण्ठ्याम् स्वीयैककोटिकप्रकारतावच्छिन्नप्रतिबध्यतानिरूपित प्रतिबन्धकतावच्छेदकीभूतापरकोटिकप्रकारताशालिज्ञानत्वं संशयत्वमिति संशयनिरूपणा वसरे दिनकर्याश्च लक्षणानि दृश्यन्ते । एकस्मिन् धर्मिणि प्रतियोगितदभाव- विषयकं ज्ञानम्, संस्कारानाधायकं ज्ञानम्, निश्चयभिन्नं ज्ञानं संशय इति१८ लक्षणानि लक्षणराजौ दृश्यन्ते । साधर्म्यात् विशेषोपलिप्सोर्विमर्शस्संशय इति१९ न्यायवार्त्तिके ।

न्यायकन्दल्यान्तु अनवस्थितरुपेणोभयविशेषसंस्पर्शी विमर्शः,२० विरुद्धार्थावमर्शज्ञानविशेषो वा संशय इति लक्षणमुपवर्णितम् । अव्यवस्थित-नानावाचकवाच्यत्वप्रतिभासे तु संशयः, परस्सरविरुद्धार्थावमर्शस्संशयः, इति लक्षणं विशेषव्यवहारपरिपन्थित्वात् अस्य अविद्यात्वमिति न्यायलीलावत्याम्, अनवधारणज्ञानं संशय इति सप्तपदार्थ्यांश्च लक्षणानि दृश्यन्ते ।

---

१७. सत्प्रतिपक्षः ।
१८. लक्षणराजी ।
१९. न्यायवार्तिकम्, १-१-२३
२०. न्यायकन्दली ।

अयथार्थानुभवेषु अन्यतमः संशयः निरूपितः। भिन्न भिन्न दर्शनेषु यथा संशयः प्रतिपादितः सः विषयः अत्र सङ्गृहीतः। तत्तत् दर्शनेषु उल्लिखितानि संशयस्य लक्षणानि, उदाहरणानि च चर्चितानि।

डा. भास्करभट्टः जोशि
सहायकप्राध्यापकः,
न्यायविभागः
कर्नाटकसंस्कृतविश्वविद्यालयः,
बेङ्गलूरु-560018, कर्नाटक
Mobil : **9742269403**
E-mail : **joshi.bhat@gmail.com**

*******